श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

# श्रीमद्भागवत रसिक कुटुंब

## UG-11.12- द्वितीय सोपान



स्व धाम प्रस्थान को देखो हो रहे श्री कृष्ण तैयार।
उद्धृत किए उद्धव समक्ष अद्भुत अनमोल उद्गार।।

**नारायणं(न्) नमस्कृत्य, नरं(ञ्) चैव नरोत्तमम्।**
**देवीं(म्) सरस्वतीं(म्) व्यासं(न्), ततो जयमुदीरयेत्॥**

**nārāyaṇaṃ(n) namaskṛtya, naraṃ(ñ)caiva narottamam**

**devīṃ(m) sarasvatīṃ(m) vyāsaṃ(n), tato jayamudīrayet**

**नामसङ्कीर्तनं(म्) यस्य, सर्वपापप्रणाशनम्।**
**प्रणामो दुःखशमनस्, तं(न्) नमामि हरिं(म्) परम्॥**

**nāmasaṅkīrtanaṃ(m) yasya, sarvapāpapraṇāśanam**

**praṇāmo duḥkhaśamanas, taṃ(n) namāmi hariṃ(m) param**

**श्रीमद्भागवतमहापुराणम्**

**एकादशः स्कन्धः**

**॥ अथ द्वादशोऽध्यायः ॥**

**ŚrīmadBhāgawatamahāpurāṇam**

**Ekādaśḥ skandhaḥ**

**.. Atha dvādaśo'dhyāyaḥ ..**

### श्रीभगवानुवाच

**न रोधयति मां(म्) योगो, न सां(ङ्)ख्यं(न्) धर्म एव च ।**
**न स्वाध्यायस्तपस्त्यागो, नेष्टापूर्तं(न्) न दक्षिणा ॥ 1॥**

śrībhagavānuvāca

**na rodhayati māṃ(m) yogo, na sāṃ(ṅ)khyaṃ(n) dharma eva ca .**

**na svādhyāyastapastyāgo, neṣṭāpūrtaṃ(n) na dakṣiṇā .. 1..**

svādhyā+ yastapas+ tyāgo

**व्रतानि यज्ञश्छान्दां(व्)सि, तीर्थानि नियमा यमाः ।**

**यथावरुन्धे सत्सं(ङ्)गः(स्), सर्वसं(ङ्)गापहो हि माम् ॥ 2॥**

**vratāni yajñāśchāndāṃ(v)si, tīrthāni niyamā yamāḥ .**

**yathāvarundhe satsaṃ(ṅ)gaḥ(s), sarvasaṃ(ṅ)gāpaho hi mām .. 2..**

yajñaś+ chāndāṃ(v)si, yathā+ varundhe, sarva+ saṃ(ṅ)gāpaho

**सत्सं(ङ्)गेन हि दैतेया, यातुधाना मृगाः(ख्) खगाः ।**

**गन्धर्वाप्सरसो नागाः(स्), सिद्धाश्चारणगुह्यकाः ॥ 3॥**

**satsaṃ(ṅ)gena hi daiteyā, yātudhānā mṛgāḥ(kh) khagāḥ .**

**gandharvāpsaraso nāgāḥ(s), siddhāścāraṇaguhyakāḥ .. 3..**

gandharvāp+ saraso, siddhāś+ cāraṇa+ guhyakāḥ

**विद्याधरा मनुष्येषु , वैश्याः(श्) शूद्राः(स्) स्त्रियोऽन्त्यजाः ।**

**रजस्तमः(फ्) प्रकृतयस्- तस्मिं(व्)स्तस्मिन् युगेऽनघ ॥ 4॥**

**vidyādharā manuṣyeṣu, vaiśyāḥ(ś) śūdrāḥ(s) striyo'ntyajāḥ .**

**rajastamaḥ(ph) prakṛtayas- tasmiṃ(v)stasmin yuge'nagha .. 4..**

striyo'n+ tyajāḥ, tasmiṃ(v)s+ tasmin

**बहवो मत्पदं(म्) प्राप्तास्- त्वाष्ट्रकायाधवादयः ।**

**वृषपर्वा बलिर्बाणो, मयश्चाथ विभीषणः ॥ 5॥**

**bahavo matpadaṃ(m) prāptās- tvāṣṭrakāyādhavādayaḥ .**

**vṛṣaparvā balirbāṇo, mayaścātha vibhīṣaṇaḥ .. 5..**

tvāṣṭra+ kāyā+ dhavādayaḥ

सुग्रीवो हनुमानृक्षो, गजो गृध्रो वणिक्पथः ।
व्याधः(ख्) कुब्जा व्रजे गोप्यो, यज्ञपत्न्यस्तथापरे ॥ 6॥

sugrīvo hanumānṛkṣo, gajo gṛdhro vaṇikpathaḥ .
vyādhaḥ(kh) kubjā vraje gopyo, yajñapatnyastathāpare .. 6..

yajña+ patnyas+ tathāpare

ते नाधीतश्रुतिगणा, नोपासितमहत्तमाः ।
अव्रतातप्ततपसः(स्), सत्सं(ङ्)गान्मामुपागताः ॥ 7॥

te nādhītaśrutigaṇā, nopāsitamahattamāḥ .
avratā'taptatapasaḥ(s), satsaṃ(ṅ)gānmāmupāgatāḥ .. 7..

nādhī+ taśrutigaṇā, nopā+ sita+ mahattamāḥ,

avratā'+ tapta+ tapasaḥ(s), satsaṃ(ṅ)gān+ māmupā+ gatāḥ

केवलेन हि भावेन, गोप्यो गावो नगा मृगाः ।
येऽन्ये मूढधियो नागाः(स्), सिद्धा मामीयुरञ्जसा ॥ 8॥

kevalena hi bhāvena, gopyo gāvo nagā mṛgāḥ .
ye'nye mūḍhadhiyo nāgāḥ(s), siddhā māmīyurañjasā .. 8..

māmī+ yurañjasā

यं(न्) न योगेन सां(ङ्)ख्येन, दानव्रततपोऽध्वरैः ।
व्याख्यास्वाध्यायसं(न्)न्यासैः(फ्), प्राप्नुयाद् यत्नवानपि ॥ 9॥

yaṃ(n) na yogena sāṃ(ṅ)khyena, dānavratatapo'dhvaraiḥ .
vyākhyāsvādhyāyasaṃ(n)nyāsaiḥ(ph), prāpnuyād yatnavānapi .. 9..

vyākhyās+ vādhyāya+ saṃ(n)nyāsaiḥ(ph)

रामेण सार्धं(म्) मथुरां(म्) प्रणीते,
श्वाफल्किना मय्यनुरक्तचित्ताः ।
विगाढभावेन न मे वियोग-

तीव्राधयोऽन्यं(न्) ददृशुः(स्) सुखाय ॥ 10॥

rāmeṇa sārdhaṃ(m) mathurāṃ(m) praṇīte

śvāphalkinā mayyanuraktacittāḥ .

vigāḍhabhāvena na me viyoga-

tīvrādhayo'nyaṃ(n) dadṛśuḥ(s) sukhāya .. 10..

śvā+ phalkinā, mayyanu+ raktacittāḥ, tīvrā+ dhayo'nyaṃ(n)

तास्ताः(ह्) क्षपाः(फ्) प्रेष्ठतमेन नीता,

मयैव वृन्दावनगोचरेण ।

क्षणार्धवत्ताः(फ्) पुनरं(ङ्)ग तासां(म्),

हीना मया कल्पसमा बभूवुः ॥ 11॥

tāstāḥ(h) kṣapāḥ(ph) preṣṭhatamena nītā

mayaiva vṛndāvanagocareṇa .

kṣaṇārdhavattāḥ(ph) punaraṃ(ṅ)ga tāsāṃ(m)

hīnā mayā kalpasamā babhūvuḥ .. 11..

vṛndā+ vana+ gocareṇa, kṣaṇārdha+ vattāḥ(ph)

ता नाविदन् मय्यनुषं(ङ्)गबद्ध-

धियः(स्) स्वमात्मानमदस्तथेदम् ।

यथा समाधौ मुनयोऽब्धितोये,

नद्यः(फ्) प्रविष्टा इव नामरूपे ॥ 12॥

tā nāvidan mayyanuṣaṃ(ṅ)gabaddha-

dhiyaḥ(s) svamātmānamadastathedam .

yathā samādhau munayo'bdhitoye

nadyaḥ(ph) praviṣṭā iva nāmarūpe .. 12..

mayya+ nuṣaṃ(ṅ)ga+ baddha,

svamātmā+ namadas+ tathedam, munayo'b+ dhitoye

**मत्कामा रमणं(ञ्) जार- मस्वरूपविदोऽबलाः ।**

**ब्रह्म मां(म्) परमं(म्) प्रापुः(स्), सं(ङ्)गाच्छतसहस्रशः ॥ 13॥**

**matkāmā ramaṇaṃ(ñ) jāra- masvarūpavido'balāḥ .**

**brahma māṃ(m) paramaṃ(m) prāpuḥ(s), saṃ(ṅ)gācchatasahasraśaḥ .. 13..**

masvarūpa+ vido'balāḥ,

saṃ(ṅ)gācchata+ sahasraśaḥ

**तस्मात्त्वमुद्धवोत्सृज्य, चोदनां(म्) प्रतिचोदनाम् ।**

**प्रवृत्तं(ञ्) च निवृत्तं(ञ्) च, श्रोतव्यं(म्) श्रुतमेव च ॥ 14॥**

**tasmāttvamuddhavotsṛjya, codanāṃ(m) praticodanām .**

**pravṛttaṃ(ñ) ca nivṛttaṃ(ñ) ca, śrotavyaṃ(m) śrutameva ca .. 14..**

tasmāt+ tvamud+ dhavot+ sṛjya

**मामेकमेव शरण- मात्मानं(म्) सर्वदेहिनाम् ।**

**याहि सर्वात्मभावेन, मया स्या ह्यकुतोभयः ॥ 15॥**

**māmekameva śaraṇa- mātmānaṃ(m) sarvadehinām .**

**yāhi sarvātmabhāvena, mayā syā hyakutobhayaḥ .. 15..**

sarvāt+ mabhāvena

**उद्धव उवाच**

**संशयः(श्) शृण्वतो वाचं(न्), तव योगेश्वरेश्वर ।**

**न निवर्तत आत्मस्थो, येन भ्राम्यति मे मनः ॥ 16॥**

**uddhava uvāca**

**saṃśayaḥ(ś) śṛṇvato vācaṃ(n), tava yogeśvareśvara .**

**na nivartata ātmastho, yena bhrāmyati me manaḥ .. 16..**

श्रीभगवानुवाच

स एष जीवो विवरप्रसूतिः(फ्),

प्राणेन घोषेण गुहां(म्) प्रविष्टः ।

मनोमयं(म्) सूक्ष्ममुपेत्य रूपं(म्),

मात्रा स्वरो वर्ण इति स्थविष्ठः ॥ 17॥

śrībhagavānuvāca

sa eṣa jīvo vivaraprasūtiḥ(ph),

prāṇena ghoṣeṇa guhāṃ(m) praviṣṭaḥ .

manomayaṃ(m) sūkṣmamupetya rūpaṃ(m)

mātrā svaro varṇa iti sthaviṣṭhaḥ .. 17..

viva+raprasūtiḥ(ph), sūkṣ+ mamupetya

यथानलः(ख्) खेऽनिलबन्धुरूष्मा,

बलेन दारुण्यधिमथ्यमानः ।

अणुः(फ्) प्रजातो हविषा समिध्यते,

तथैव मे व्यक्तिरियं(म्) हि वाणी ॥ 18॥

yathānalaḥ(kh) khe'nilabandhurūṣmā

balena dāruṇyadhimathyamānaḥ .

aṇuḥ(ph) prajāto haviṣā samidhyate

tathaiva me vyaktiriyaṃ(m) hi vāṇī .. 18..

khe'+ nilabandhu+ rūṣmā, dāruṇ+ yadhimath+ yamānaḥ

एवं(ङ्) गदिः(ख्) कर्म गतिर्विसर्गो,

घ्राणो रसो दृक् स्पर्शः(श्) श्रुतिश्च ।

सङ्कल्पविज्ञानमथाभिमानः(स्),

सूत्रं(म्) रजः(स्)सत्त्वतमोविकारः ॥ 19॥

evaṃ(ṅ) gadiḥ(kh) karma gatirvisargo

ghrāṇo raso dṛk sparśaḥ(ś) śrutiśca .

saṅkalpavijñānamathābhimānaḥ(s)

sūtraṃ(m) rajaḥ(s)sattvatamovikāraḥ .. 19..

gatir+ visargo, saṅkalpa+ vijñāna+ mathābhimānaḥ(s),

rajaḥ(s)sattva+ tamo+ vikāraḥ

अयं(म्) हि जीवस्त्रिवृदब्जयोनि-

रव्यक्त एको वयसा स आद्यः ।

विश्लिष्टशक्तिर्बहुधेव भाति,

बीजानि योनिं(म्) प्रतिपद्य यद्वत् ॥ 20॥

ayaṃ(m) hi jīvastrivṛdabjayoni-

ravyakta eko vayasā sa ādyaḥ .

viśliṣṭaśaktirbahudheva bhāti

bījāni yoniṃ(m) pratipadya yadvat .. 20..

jīvas+ trivṛdab+ jayoni, viśliṣṭa+ śaktir+ bahudheva

यस्मिन्निदं(म्) प्रोतमशेषमोतं(म्),

पटो यथा तन्तुवितानसं(व्)स्थः ।

य एष सं(व्)सारतरुः(फ्) पुराणः(ख्),

कर्मात्मकः(फ्) पुष्पफले प्रसूते ॥ 21॥

yasminnidaṃ(m) protamaśeṣamotaṃ(m)

paṭo yathā tantuvitānasaṃ(v)sthaḥ .

ya eṣa saṃ(v)sārataruḥ(ph) purāṇaḥ(kh)

karmātmakaḥ(ph) puṣpaphale prasūte .. 21..

prota+ maśeṣa+ motaṃ(m), tantu+ vitāna+ saṃ(v)sthaḥ

द्वे अस्य बीजे शतमूलस्त्रिनालः(फ्),
पं(ञ्)चस्कन्धः(फ्) पं(ञ्)चरसप्रसूतिः ।
दशैकशाखो द्विसुपर्णनीडस्-
त्रिवल्कलो द्विफलोऽर्कं(म्) प्रविष्टः ॥ 22॥

dve asya bīje śatamūlastrinālaḥ(ph)
paṃ(ñ)caskandhaḥ(ph) paṃ(ñ)carasaprasūtiḥ .
daśaikaśākho dvisuparṇanīḍas-
trivalkalo dviphalo'rkaṃ(m) praviṣṭaḥ .. 22..

śatamūlas+ trinālaḥ(ph),
paṃ(ñ)carasa+ prasūtiḥ, dvisuparṇa+ nīḍas

अदन्ति चैकं(म्) फलमस्य गृध्रा,
ग्रामेचरा एकमरण्यवासाः ।
हं(व्)सा य एकं(म्) बहुरूपमिज्यैर्-
मायामयं(म्) वेद स वेद वेदम् ॥ 23॥

adanti caikaṃ(m) phalamasya gṛdhrā
grāmecarā ekamaraṇyavāsāḥ .
haṃ(v)sā ya ekaṃ(m) bahurūpamijyair-
māyāmayaṃ(m) veda sa veda vedam .. 23..

eka+ maraṇya+ vāsāḥ,
bahurū+ pamijyair

एवं(ङ्) गुरूपासनयैकभक्त्या,
विद्याकुठारेण शितेन धीरः।
विवृश्च्य जीवाशयमप्रमत्तः(स्),
सम्पद्य चात्मानमथ त्यजास्त्रम् ॥ 24॥

**evaṃ(ṅ) gurūpāsanayaikabhaktyā**

**vidyākuṭhāreṇa śitena dhīraḥ**

**vivṛścya jīvāśayamapramattaḥ(s)**

**sampadya cātmānamatha tyajāstram .. 24..**

gurūpā+ sanayai+ kabhaktyā,

jīvā+ śayama+ pramattaḥ(s), cātmā+ namatha

**इति श्रीमद्भागवते महापुराणे पारमहंस्यां**

**संहितायामेकादशस्कन्धे द्वादशोऽध्यायः ॥**

**iti śrīmadbhāgavate mahāpurāṇe pāramahaṃsyāṃ**

**saṃhitāyāṃekādaśaskandhe dvādaśo'dhyāyaḥ .. 12..**

**ॐ पूर्णमदः(फ्) पूर्णमिदं(म्) पूर्णात्पूर्णमुदच्यते**

**पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते।।**

**ॐ शान्तिः(श्) शान्तिः(श्) शान्तिः।।**

**Om Pūrṇamadah(ph) Pūrṇamidaṃ(m) PūrṇātPūrṇamudacyate|**

**Pūrṇasya Pūrṇamādāya Pūrṇamevāvashiṣyate ||**

**Om Shāntih(ś) Shāntih(ś) Shāntih ||**

